जायते तत्र रेखोपरेखाद्यर्थं प्रत्यक्षोपयोगोऽपि ( v. l. रेखोपरेखादिष्वक्षोपयोगेऽपि ) शब्दस्यैव कारणत्वात् Kiraṇā. 288. 17.

[1]**अक्षोपाङ्ग** ( akṣopāṅga ) *n.* a sub-part (of the body) viz. a sense-organ यापयन् शकटं देहमक्षोपाङ्गस्य मात्रया । ···प्रभूतं सारभूतं स पुण्यद्रव्यमुपार्जयत् S'aliC. 3. 66.

[2]**अक्षोपाङ्ग** ( akṣopāṅga ) *n.* a sub-part (of the cart) viz. an axle, S'āliC. 3. 66.

**अक्षोपाञ्जन** ( akṣopāñjana ) *n.* the act of anointing the axle तृतीयमक्षोपाञ्जनायावशिनष्टि BhārS'S. x. 15. 19; चतुर्थेक आहवनीयस्योपयमनीष्वाग्नीध्रीयस्याक्षोपाञ्जने च KātyS'S. viii. 6. 33.

**अक्षोफल** ( akṣo–phala ) *adj.* [ w. r. for अक्षफल ] fruit of *Terminalia Bellerica* धात्रीफलञ्च त्रिंशच्च विंशतिद्व्यष्टमासक: । तथाक्षो( ? क्ष )फलतुल्यो य: ( पद्मराग: ) YuktiKa. 92. 7.

**अक्षोभ** ( a–kṣobha ) *m.* **1** absence of agitation, non-perturbation अक्षोभ: श्रवणं चेष्टं धनप्राप्ति: प्रियागम: BṛSaṁ. 90. 8; सर्वेन्द्रियाणां चित्तस्य चाक्षोभो वशीकारसंज्ञेति YogSā. 26. 4(2); **2** the post to which an elephant is tied आलानं शङ्कुरक्षोभ: प्रारब्धिर्गजबन्धनी TrikāS'e. ii. 8. 39 ( comm. इति पञ्च हस्तिबन्धनस्तम्भस्य ); **3** name of a *śreṣṭhin*, son of Mahendradatta सुतो महेन्द्रदत्तोऽस्य तस्याप्यक्षोभनामक: । जातो धनपति: BṛKathāK. 105. 232.

**अक्षोभ** ( a–kṣobha ) *adj.* **1 A** which cannot be disturbed, unagitated, unperturbed ( सीताया: ) अहो गाम्भीर्यमक्षोभमहो शीलमनोज्ञता PadmP.( Ra.) 79. 56; तस्मिन् ( =वीररसे ) अक्षोभो नायक: ख्यात: Kāvyālaṅ.( Ru. ) 15. 1; JinaS'. 1. 9; समयापेक्षयाक्षोभो मन्युं संस्तभ्य साल्हणि: । ···जगाद तम् RājTa.( Ka.) 8. 2683; **1 B** non-turbulent, calm (water) अक्षोभस्थितिनिश्चले···नासालग्नजल: श्वसन्मुनिवरस्तोये श्रमार्तोऽभवत् DaśāvaC. 1. 51; अक्षोभनिर्भरजला: सरितो वहन्ति DaśāvaC. 9. 52; **2** unshakable, irrefutable शान्ति वस्तनुतात्···नैगमाद्यैर्नयैरक्षोभम्···कृतम् । तत्पूज्यैर्जगतां जिनै: प्रवचनम् CaturJiStu. 3. ( comm. परवादिभिरजेयम् )

**अक्षोभक** ( akṣobha–ka ) *n.* non-perturbation पुष्पं नानाविधं दद्यादात्मनो भावसिद्धये । ···अमोहकमदम्भञ्च अद्वेषाक्षोभके तथा । अमात्सर्यमलोभञ्च दश पुष्पं प्रकीर्तितम् MahNirvāT. 5. 148.

**अक्षोभकर** ( a–kṣobhakara ) *adj.* not causing perturbation ओमिङ्कार पुष्टिदाक्षोभकर तृतीयेऽक्षे प्रतितिष्ठ AkṣMāU. 486. 12.

**अक्षोभकृष्ट** ( akṣobha–kṛṣṭa ) *adj.* pulled out or drawn without any perturbation क्षुण्णो गमिष्यत्यधुनारिमांसै: क्षुण्णोऽयमोघ: सकल: कपीनाम् । रक्षोभटा: स्वैरमिति प्रहासैरक्षोभकृष्टासिलतास्तदोचु: RāmC. 32. 28.

**अक्षोभणीय** ( a–kṣobhaṇīya ) *adj.* [ *f.* –ā ] unshakable, irrefutable इत्याद्यैर्बाह्यजल्पैरनितरगतिका संविदक्षोभणीया TattvMu. 5. 114.

**अक्षोभवत्** ( a–kṣobhava( n )t ) *adj.* free from agitation, unperturbed भवान् । मम वितरतु वीर निर्वाणशर्माणि···अक्षोभवान् CaturJiStu. 93.

**अक्षोभिणी** ( akṣobhiṇī ) *f.* a high number [ DBHS ]

**अक्षोभित** ( a–kṣobhita ) *adj.* undisturbed or unperturbed, not violated अस्ति···अन्ध्रेष्वामरकुण्डं नाम नगरम्···विपक्षपक्षैरक्षोभितम् TīrthaKa. 98. 6; ताम्बूलग्रासपूरास्यो गुरुरक्षोभित: सुधी: । निजपुत्रीवदाचर्य तद्भालपट्टके लिखेत् । शक्तिचक्रम् KulaCūT. 2. 32; तत: प्रणम्य देवेशीं वृणुयाद्वरमात्मन: । ···अक्षोभितकुलाचारपरिचर्यापरायण: KulaCūT. 6. 12.

**अक्षोभितम्** ( a–kṣobhitam ) *adv.* without being disturbed, without being molested ( रैवतकं ददर्श ) कान्तालकान्ता: ललना: सुराणां रक्षोभिरक्षोभितमुद्वहन्तम् S'iśuVa. 4. 9 = SaraKaṇṭhā. 198. 22.

**अक्षोभितभूभृत्** ( akṣobhita–bhūbhṛt ) *adj.* **1** which has caused no agitation to (other) kings अविचलितरत्नसंचयमक्षोभितभूभृदवधृ( नादृ )तभुजङ्गम् । पुरुषोत्तमस्य विसदृशमासील्लक्ष्म्याज्र्जनं यस्य EI. i. 181. 3; **2** in which the mountain (Meru) was not stirred, EI. i. 181. 3.

**अक्षोभितसुराङ्गन** ( akṣobhita–surāṅgana ) *adj.* who has not disturbed the divine damsels उपतस्थे स रक्षोभिरक्षोभितसुराङ्गनै: NemiNir. 15. 28.

**अक्षोभिन्** ( akṣobh–in ) *adj.* undisturbed (in mind), unperturbed अक्षोभी तं मागधसेव्यं व्यलुलोकत् RāghPāṇ.( Dha. ) 13. 11.

**अक्षोभ्य** ( a–kṣobhya ) *adj.* [ *f.* –ā ] **A** imperturbable, calm, serene, unfathomable (said of persons) य: समुद्र इवाक्षोभ्य: MahāBhā. iv. 64. 14; गाङ्गो ह्रद इवाक्षोभ्यो य: स पण्डित उच्यते MahāBhā. v. 33. 26; vi. 14. 12; vii. 64. 15; vii. 92. 41; HariVaṁ. 65. 10; महाराजं व्यथिताकुलचेतसम् । ···अक्षोभ्यं क्षुभ्यन्तमिव सागरम् ( रामो ददर्श ) Rāmā. ii. 16. 6; v. 36. 35; सैन्यम्···कस्येदमक्षोभ्यमभीरुजुष्टम् Rāmā. vi. 47. 12; अक्षोभ्यो ( भ्यास् ) ताललयकुशला: ।··· गायिका: NāṭyaS'ā. 33. 4; अक्षोभ्यम्···ववन्दे मधुसूदनम् ViṣṇuSm. 1. 42; अक्षोभ्य: क्षोभित: केन लक्ष्मणो धैर्यसागर: Prati. 1. 17; यस्य प्रकाशाख्यं तु विग्रहम् । आभिमानिकमक्षोभ्यं प्रद्युम्नाख्यं तु शाश्वतम् PauṣkS. 39. 26; दशरथ: ··· उदधीनिवाक्षोभ्यानवाप चतुर: पुत्रान् Kād. 62. 10; विक्रमैस्त्रिभिरक्षोभ्या: क्षोभितास्ते महासुरा: BrahmP. 213. 81; BhaviP. 190A. 4 (i. 127. 22); कृष्णराजं ससैन्यं संक्षोभ्याक्षोभ्यमाजौ EI. xxii. 240. 43; इति वादिनमक्षोभ्यं क्षुब्धचेता दशानन: । अभ्यधाल्लक्ष्मणम् RāmāMañ. 344. 9; KathāSaSāg. xii. 25. 2; xii. 27. 137; प्रभुमक्षोभ्यं विदित्वा क्वापि ते ययु: PārśvC. 6. 176; अक्षोभ्यो गम्भीर: VīraMi.( Lakṣaṇa. ) 38. 4; (said of waters, ocean) स: ।··· विलोडयामास तदा पुष्पहेतोररिंदम: । ···स्रस्तांशुकमिवाक्षोभ्यैर्निम्नगानि:सृतैर्जलै: ( गिरिम् ) MahāBhā iii. 146. 27; मन्थराप्रभवस्तीव्र: कैकेयीग्राहसंकुल: । वरदानमयोऽक्षोभ्योऽमज्जयच्छोकसागर: Rāmā. ii. 71. 13; vi. 13. 11; vi. 38. 15; देवसागरमक्षोभ्यं शस्त्रै: समवगाह्य च । जिता द्विष: Rāmā. vii. 6. 41; vii. 77. 6; शोकसागरमक्षोभ्यम्···ज्ञातयो गता: HariVaṁ. 109. 22; वारण:··· । अक्षोभ्ये विमले नानाकुसुमैरुपशोभिते । मानसे सरसि क्रीडां कुरुते PadmP.( Ra. ) 85. 157; अक्षोभ्य: ··· गुणसागर: । रामासंगेन तन्निन्द्यो बभूवासौ धरातले BṛKathāK. 81. 62; अक्षोभ्यश्चातिगम्भीरो भवान् रत्नाकरस्तथा ViṣṇuDhaP. i. 209. 12; श्रुतिमन्त्रोदमक्षोभ्यं षडङ्गावर्तसंकुलम् । वेदार्णवं द्विज: सम्यग् यत्र तीर्त्वाप्यगर्वित: EI ix. 14. 14; विधि:···अक्षोभ्यं विज्ञानसागरम्···इत्थमस्तावीत् NilaVi. 54. 11; अतिगम्भीरमनाविलमक्षोभ्यमदृष्टपारम्···विज्ञानसागरं महताम् VairāS'.( A.) 81; (said of Brahman or salvation) यत्तदक्षरमक्षोभ्यं परं ब्रह्म···वित्त तत् JayāS. 1. 21; निर्बीजमजमक्षोभ्यमाद्यं स्यादधिदैवतम् PāraS. 7. 80; PauṣkS. 29. 127; तदेकम्···अमर्शरूपमक्षोभ्यं सर्वक्षोभ्यं सुखासुखम् TantrRā. 36. 29; **B** undisturbable, constant, unaffected महासरसि गम्भीरे पूर्णेऽम्बु स्तिमितं यथा । तिष्ठति स्थिरमक्षोभ्यं तद्वद्गत: कफ: CaraS. vi. 27. 12 (1941 Ed.); तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह स: RaghuVa. 4. 80; अक्षोभ्य: स नवोऽप्यासीद्दृढमूल इव द्रुम: RaghuVa. 17. 44; सूक्ष्मं सत्कार्यमक्षोभ्यम् TattvSa. (9). 130. 11; त्वम्···क्षान्तिर्मुनीनामक्षोभ्या MatsyaP. 154. 77; PadmP. v. 40. 76; ऐशान्यां वल्मीको यत्र कोविदारस्य । मध्ये तयोर्नरैरर्धपञ्चमैस्तोयमक्षोभ्यम् BṛSaṁ. 54. 27; अक्षोभ्या तव भारती जिनपते CaturJiStu. 87; Yādavā. 22. 19; S'ārṅgaPa. 2189; अवार्यमक्षोभ्यम्···मया योगफलं निषेव्यते BhagAjju. 47. (14); अक्षोभ्य: सुहर:···गत: श्लैष्मिक: MātaLī. 11. 40; अक्षोभ्यै: स्वकृपापाङ्गैरुद्धरन्देशिकव्रजान् । ···विग्रही बत शंकर: ParamāKā. 135. 27; दंशर्क्षवृकजम्बूककपिपन्नगपक्षिण: । रक्षन् स्वलक्षैरक्षोभ्यै: ParamāKā. 143. 7; 145. 39; अक्षोभ्यं भिषजां शतैरविषय:···किमिदं किंनाम न ज्ञायते NilaVi. 99. 11.

**अक्षोभ्य** ( a–kṣobhya ) *m.* **1** a very large number ( =ten Mahāvisva( ? va )ras ) दशमहाविस्व( ? व )रा अक्षोभ्य: AbhiDhKoBh. 181. 13 (*on* 3. 94); **2 A i** name of Viṣṇu विक्रमैस्त्रिभिरक्षोभ्यो जहाराशु स मेदिनीम् MahāBhā. iii. App. I. 27. 79; (सुवर्णबिन्दुरक्षोभ्य:···केशवस्य···। नाम्नां सहस्रम् MahāBhā. xiii. 135. 99; रागद्वेषादिभि: शब्दादिविषयैश्च त्रिदशारिभिश्च न क्षोभ्यत इति अक्षोभ्य: ViṣṇuSaBh. 108. 2 (*on* 99); 126. 5 (*on* 120); **2 A ii** name of S'iva उग्रतारोवाच । अक्षोभ्य श्रोतुमिच्छामि S'aktiSaṁT. i. 2. 1; **2 A iii** name of a Buddha एवमेव तेऽक्षोभ्यादयोऽपि तथागता मद्बुद्धक्षेत्रावस्थितबोधिसत्त्वानां नामादिकीर्तनपरा धर्मं देशयन्ति AbhisaAlāṅĀ. 485. 12; वैरोचनाक्षोभ्यामोघश्च···सर्वो विबुद्धस्तत्त्वमुच्यते HevajraT. i. v. 12; ii. 4. 101; ĪśānS'iPa. i. 26. 8; **2 A iv** name of Jina अचलस्थितिरक्षोभ्य: कूटस्थ: स्थाणुरक्षय: MahāP. 25. 114; **2 B i** name of a sage (Tantra) तथा विद्या सुसंजाता अक्षोभ्यमुनिरूपिणी S'aktiSaṁT. i. 1. 84; **2 B ii** name of one of the ten sons of Andhaka Vṛṣṇi and Subhadrā आसीदन्धकवृष्णेश्च सुभद्रेति सधर्मिणी । ··· दशाभूवन्सुतास्तयो: । ··· समुद्रविजय: पूर्वमक्षोभ्यस्तदनन्तरम् PāṇḍaC. 1. 426; 12. 7; **2 B iii** name of a disciple of Dakṣiṇāmūrti अब्रवीद् दक्षिणामूर्तिश्छात्रमक्षोभ्यनामकम् UddhāK. 1. 16; 2. 3; *n.* **1** name of a city पश्चिमां दिशमारभ्य यावत् षष्टितमं पुरम् । अर्जुनी चारुणी चैव···गोक्षीरफेनमक्षोभ्यम्···पुरम् MahāP. 19. 85; **2** name of one of the sixty-four couples अक्षोभ्यादिचतु:षष्टिमिथुनानि समर्धयेत् KulārT. 10. 85.

**अक्षोभ्य** ( a–kṣobhya ) *ger.* without irritating or agitating नाक्षोभ्य हि मनो मद्यं शरीरमविहत्य च । कुर्यान्मदात्ययं तस्मादेष्टव्या हर्षणी क्रिया CaraS. vi. 24. 194 (1941 Ed.)

**अक्षोभ्यक** ( akṣobhya–ka ) *m.* name of a pupil of Dakṣiṇāmūrti दक्षिणामूर्तिना तस्मिन् कालेऽन्तेवासिने तदा । भाषिता षोडशी विद्या ननन्दाक्षोभ्यको मुनि: UddhāK. 3. 2.

**अक्षोभ्यकवच** ( akṣobhya–kavaca ) *n.* [ अक्षोभाय हितम् अक्षोभ्यम् ] a sort of *kavaca* or armour referred to in the Tantras [ APTE ]

**अक्षोभ्यका** ( akṣobhyakā ) *f.* name of one of the sixty-four S'aktis बगला मालिनी तारा त्रिजटाऽक्षोभ्यकाक्षके S'aktiSaṁT. i. 2. 61.